श्री काळी कवचं (त्रैलोक्यविजयं)

श्री काळी कवचं (त्रैलोक्यविजयं)

श्रीसदाशिव उवाच |
त्रैलोक्यविजयस्यास्य कवचस्य ऋषिः शिवः |
छंदोऽनुष्टुब्देवता च आद्याकाळी प्रकीर्तिता || 1 ||

मायाबीजं बीजमिति रमा शक्तिरुदाहृता |
क्रीं कीलकं काम्यसिद्धौ विनियोगः प्रकीर्तितः || 2 ||

अथ कवचं |
ह्रीमाद्या मे शिरः पातु श्रीं काळी वदनं मम |
हृदयं क्रीं परा शक्तिः पायात्कंठं परात्परा || 3 ||

नेत्रे पातु जगद्धात्री कर्णौ रक्षतु शंकरी |
घ्राणं पातु महामाया रसनां सर्वमंगळा || 4 ||

दंतान् रक्षतु कौमारी कपोलौ कमलालया |
ओष्ठाधरौ क्षमा रक्षेच्चिबुकं चारुहासिनी || 5 ||

ग्रीवां पायात्कुलेशानी ककुत्पातु कृपामयी |
द्वौ बाहू बाहुदा रक्षेत्करौ कैवल्यदायिनी || 6 ||

स्कंधौ कपर्दिनी पातु पृष्ठं त्रैलोक्यतारिणी |
पार्श्वे पायादपर्णा मे कटिं मे कमठासना || 7 ||

नाभौ पातु विशालाक्षी प्रजास्थानं प्रभावती |
ऊरू रक्षतु कल्याणी पादौ मे पातु पार्वती || 8 ||

जयदुर्गाऽवतु प्राणान् सर्वांगं सर्वसिद्धिदा |
रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन च || 9 ||

तत्सर्वं मे सदा रक्षेदाद्याकाळी सनातनी |
इति ते कथितं दिव्यं त्रैलोक्यविजयाभिधं || 10 ||

कवचं काळिकादेव्या आद्यायाः परमाद्भुतं |
पूजाकाले पठेद्यस्तु आद्याधिकृतमानसः || 11 ||

सर्वान् कामानवाप्नोति तस्याद्याशु प्रसीदति |
मंत्रसिद्धिर्भवेदाशु किंकराः क्षुद्रसिद्धयः || 12 ||

अपुत्रो लभते पुत्रं धनार्थी प्राप्नुयाद्धनं |
विद्यार्थी लभते विद्यां कामी कामानवाप्नुयात् || 13 ||

सहस्रावृत्तपाठेन वर्मणोऽस्य पुरस्क्रिया |
पुरश्चरणसंपन्नं यथोक्तफलदं भवेत् || 14 ||

चंदनागरुकस्तूरीकुंकुमै रक्तचंदनैः |
भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि || 15 ||

शिखायां दक्षिणे बाहौ कंठे वा साधकः कटौ |
तस्याद्या काळिका वश्या वांछितार्थं प्रयच्छति || 16 ||

न कुत्रापि भयं तस्य सर्वत्र विजयी कविः |
अरोगी चिरजीवी स्याद्बलवान् धारणक्षमः || 17 ||

सर्वविद्यासु निपुणः सर्वशास्त्रार्थतत्त्ववित् |
वशे तस्य महीपाला भोगमोक्षौ करस्थितौ || 18 ||

इति महानिर्वाणतंत्रे सप्तमोल्लासे त्रैलोक्यविजयकवचं नाम श्री काळिका कवचं |